शृङ्गारवीरादौ व्यभिचारिण एव। तदुक्तम् "रसावस्थः परं भावः स्थायितां प्रतिपद्यते" इति। अस्य स्वरूपकथनगर्भं आस्वादप्रकारः कथ्यते। "सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः। वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः। लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभिः। स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः। रजस्तमोभ्यामस्पृष्टं मनः सत्त्वमिहोच्यते" इत्युक्तप्रकारो बाह्यमेयविमुखतापादकः कश्चनान्तरो धर्मः सत्त्वं तस्योद्रेकः रजस्तमसी अभिभूयाविर्भावः। अत्र च हेतुस्तथाविधालौकिककाव्यार्थपरिशीलनम्। अखण्ड इत्येक एवायं विभावादिरत्यादिप्रकाशसुखचमत्कारात्मकः। अत्र हेतुं वक्ष्यामः। स्वप्रकाशत्वाद्यपि वक्ष्यमाणरीत्या। चिन्मय इति स्वरूपार्थे मयट्। चमत्कारश्चित्तविस्ताररूपो विस्मयापरपर्य्यायः। तत्प्राणत्वञ्चास्मद्वृद्धप्रपितामहसहृदयगोष्ठीगरिष्ठकविपण्डितमुख्यश्रीमन्नारायणपादैरुक्तं। तदाह धर्मदत्तः स्वग्रन्थे

"रसे सारश्चमत्कारः सर्वत्राप्यनुभूयते। तच्चमत्कारसारत्वे सर्वत्राप्यद्भुतो रसः। तस्मादद्भुतमेवाह कृती नारायणो रसमिति"। "कैश्चिदिति प्राक्तनपुण्यशालिभिः तदुक्तं "पुण्यवन्तः प्रमिण्वन्ति योगिवद्रससन्ततिमिति" यद्यपि "स्वादः काव्यार्थसम्भेदादात्मानन्दसमुद्भवः" इत्युक्तदिशा रसस्यास्वादानतिरिक्तत्वमुक्तं तथापि "रसः स्वाद्यते" इति काल्पनिकं भेदमुररीकृत्य कर्मकर्त्तरि वा प्रयोगः। तदुक्तम् "रस्यमानतामात्रसारत्वात् प्रकाशशरीरादनन्य एव हि रसः" इति। एवमन्यत्राप्येवंविधस्थलेषूपचारेण प्रयोगा ज्ञेयाः। नन्वेतावता रसस्याज्ञेयत्वमुक्तं भवतीति व्यञ्जनायाश्च ज्ञानविशेषत्वाद् द्वयोरैक्यमापतितम् ततश्च "स्वज्ञानेनान्यधीहेतुः सिद्धेऽर्थे व्यञ्जको मतः। यथा दीपोऽन्यथाभावे को विशेषोऽस्य कारकात्" इत्युक्तदिशा घटप्रदीपवद् व्यङ्ग्यव्यञ्जकोः पार्थक्यमेवेति कथं रसस्य व्यङ्ग्यतेति चेत् सत्यमुक्तम् अत एवाहुः "विलक्षण एवायं कृतिज्ञप्तिभेदेभ्यः स्वादनाख्यः कश्चिद्व्यापारः। अत एव हि रसनास्वादनचमत्करणादयो विलक्षणा एव व्यपदेशा इति अभिधादिविलक्षणव्यापारतायाः प्रसाधनप्रवणैरस्माभी रसादीनां व्यङ्ग्यत्वमुक्तं भवतीति। ननु तर्हि करुणादीनां रसानां दुःखमयत्वाद्रसत्वं न स्यादित्युच्यते" "करुणादावपि रसे जायते यत् परं सुखम्। सचेतसामनुभवः प्रमाणं तत्र केवलम्"। आदिशब्दाद् बीभत्सभयानकादयः। तथाप्यसहृदयानां मुखमुद्रणाय पक्षान्तरमुच्यते। "किञ्च तेषु यदा दुःखं न कोऽपि स्यात्तदुन्मुखः"। न हि कश्चित् सचेता आत्मनो दुःखाय प्रवर्त्तते करुणादिषु च सकलस्यापि साभिनिवेशप्रवृत्तिदर्शनात्। अनुपपत्त्यन्तरमाह। "तथा रामायणादीनां भविता दुःखहेतुता"। "करुणरसस्य दुःखहेतुत्वात् करुणरसप्रधानरामायणादिप्रबन्धानामपि दुःखहेतुत्वप्रसङ्गः स्यात्। ननु कथं दुःखकारणेभ्यः सुखोत्पत्तिरित्याह "हेतुत्वं शोकहर्षादेर्गतेभ्यो लोकसंश्रयात्। शोकहर्षादयो लोके जायन्तां नाम लौकिकाः। अलौकिकविभावत्वं प्राप्तेभ्यः काव्यसंश्रयात्। सुखं संजायते तेभ्यः सर्वेभ्योऽपीति का क्षतिः"। ये खलु रामवनवासादयो लोके दुःखकारणानि इत्युच्यन्ते त एव हि काव्यनाट्यसमर्पिता अलौकिकविभावनव्यापारवत्तया कारणशब्दवाच्यत्वं विहायालौकिकविभावशब्दवाच्यत्वं भजन्ते। तेभ्यश्च सुरते दन्तघातादिभ्य इव सुखमेव जायते। अतश्च लौकिकशोकहर्षादिकारणेभ्यो लौकिकशोकहर्षादयो जायन्ते इति लोक एव प्रतिनियमः। काव्ये पुनः सर्वेभ्योऽपि विभावादिभ्यः सुखमेव जायते इति नियमान्न कश्चिद्दोषः। कथं तर्हि हरिश्चन्द्रादिचरितस्य काव्यनाट्ययोरपि दर्शनश्रवणाभ्यामश्रुपातादयो जायन्त इत्युच्यते। "अश्रुपातादयस्तद्वद्द्रुतत्वाच्चेतसो मताः"। तर्हि कथं काव्यतः सर्वेषामीदृशी रसाभिव्यक्तिर्न जायत इत्याह "न जायते तदास्वादो विना रत्यादिवासनाम्"। वासना चेदानीन्तनी प्राक्तनी च रसास्वादहेतुः। तत्र यदि आद्या न स्याच्छ्रोत्रियजरन्मीमांसकादीनामपि स स्यात्। यदि द्वितीया न स्याद् यद्रागिणामपि केषाञ्चिद्रसोद्बोधो न दृश्यते तन्न स्यात्। उक्तञ्च धर्मदत्तेन "सवासनानां सभ्यानां रसस्यास्वादनं भवेत्। निर्वासनास्तु रङ्गान्तःकाष्ठकुड्याश्मसन्निभाः" इति। ननु कथं रामादिरत्याद्युद्बोधकारणैः सीतादिभिः सामाजिकरत्याद्युद्बोध इत्युच्यते "व्यापारोऽस्ति विभावादेर्नाम्ना साधारणीकृतिः। तत्प्रभावेन यस्यासन् पाथोधिप्लवनादयः। प्रमाता तदभेदेन स्वात्मानं प्रतिपद्यते"। "ननु कथं मनुष्यमात्रस्य समुद्रलङ्घनादावुत्साहोद्बोध इत्युच्यते "उत्साहादिसमुद्बोधः साधारण्याभिमानतः।